# पाठ-१२
# संवाद लेखनम्

**सारान्शः**
संवाद लेखनार्थम् अपेक्षितानि आवश्यकतत्त्वानि।
**(i)** सन्दर्भः
**(ii)** पात्राणि
**(iii)** विषयवस्तु
**(iv)** परिवेशः / वातावरणम्
**(v)** पात्रानुसारं भाषासङ्गतिः
**(vi)** उपयुक्तसूक्तीनां / पद्यानां / उद्धरणानां ज्ञानम्

**<u>संवाद लेखनस्य उपाङ्गानि</u>**




**सन्दर्भ-** संवादार्थं सन्दर्भः महत्त्वपूर्णः वर्तते यथा रुग्णस्य चिकित्सकस्य मध्ये, आपणे ग्राहकस्य विक्रेतुः मध्ये च इत्यादयः बहवः सन्दर्भाः भवितुं शक्नुवन्ति ।सन्दर्भानुसारम् एव भाषायाः प्रयोगे वाक्यचयनं पदचयनं च करणीयम् ।
**पत्राणि-** संवादः तु द्वयोः पात्रयोः मध्ये एव प्रवृत्तः भविष्यति । अतः छात्रैः/छात्राभिः सह शिक्षिकायाः अपि वार्तालापः भवितुं शक्नोति।पात्रानुसारं भाषायाः प्रयोगः अपेक्षितः।
**विषय वस्तु -** पात्राणां संवादस्य विषयः कः इत्यापि विचारणीयः ।संवादः कस्मिन् वातावरणे प्रचलति इत्यपि आवश्यकम् ।

**भाषावैविध्यम्-**संवादे भाषा पात्रानुसारं परिवर्तते संस्कृतनाटकेषु स्त्रीजनाः अथवा अशिक्षिताः प्राकृतभाषायाः प्रयोगमेव कुर्वन्ति । संवादे प्रयुक्तया भाषया शब्दावल्या च पात्रस्य चारित्रिक वैशिष्ट्यं सिद्धं भवति ।
**सुभाषितानां / सूक्तीनां / पद्यानां प्रयोगः**
संवादे यदा पात्राणि स्वाभिप्रायं सिद्धं कर्तुं किमपि सुभाषितं श्लोकं पद्यं वा उदाहरणस्वरूपेण उच्चारयन्ति तदा तस्य पात्रस्य वाक्कौशलं वैदुष्यं स्मृतिः च स्पष्टीभवति ।

**मुख्य बिन्दवः**
**संवादे शुद्धभाषाप्रयोगः**
अस्माभिः भाषाम् अधिकृत्य केचन बिन्दवः ध्यातव्याः।
- संवादे प्रत्येकं कथनं परस्परं सम्बद्धं, तर्कपूर्णं च भवेत् ।
- भाषा शुद्धा भवेत्, क्रियापदानि कर्तृपदानुसाराणि भवेयुः ।
- विशेषणेषु सा एव विभक्तिः भवेत् या विशेष्येण सह प्रयुज्यते यथा रम्यम् उद्यानम्, रम्या वाटिका, रम्यः सरोवरः इत्यादयः ।
- भाषा पात्रानुसारं भवेत् ।

**अवगच्छामः**
**चित्रं दृष्ट्वा संवादः**
भवद्भिः दृष्टं यत् संवादे सन्दर्भस्य आवश्यकता भवति । सन्दर्भः चित्ररूपेण अपि भवितुं शक्नोति । किमपि चित्रं वयं समाचार पत्रेषु पश्यामः । तत् दृष्ट्वा च आश्चर्यचकिताः भूत्वा वार्तालापं कुर्मः। तदेव चित्र संवादः।

**आवश्यकोऽयं ज्ञानम्**
चित्तन्तयत, वयं भाषायाः प्रयोगं कदा कुर्मः? नूनं यदा वयं किमपि वक्तुम् इच्छामः। वचनार्थम् अन्यस्य जनस्य आवश्यकता भवति अपि च सन्दर्भस्य अपि अपेक्षा जायते । यद्यपि वयं चिन्तने अपि भाषायाः प्रयोगं कुर्मः परन्तु संवादे तु अन्यः जनः अपेक्षितः भवति। वयं येन सह वार्तालापं कुर्मः तस्य आवश्यकतानुसारं परिस्थित्यनुसारं च भाषायां परिवर्तनं भवति । यदि अस्माकं गृहे कश्चित् महात्मा आगच्छति तदा अस्माकं व्यवहारः विनम्रः भवति । विराज्यताम्, आसनं स्वीकुरुत इत्यादि । परन्तु यदि कश्चिद् भिक्षुकः आगच्छति वयं किमपि द्वारे दत्त्वा गृहे प्रविशामः । केचन तु भिक्षुकं दृष्ट्वा अपशब्दान्

अपि वदन्ति । अतः सन्दर्भानुसारं भाषायां परिवर्तनं भवति ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

- **यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।**
  **तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य ।।**

विशेषणस्य लिङ्गं वचनं विभक्तिः च विशेष्यानुसारं भवति।

वर्णैः प्रातिपदिकानां रचना भवति यथा र+आ+म् + अ = इति मिलित्वा 'राम' प्रातिपदिकं भवति । परन्तु प्+अ+ठ् पठ् इति धातुः प्रातिपदिकम् न उच्यते। = प्रत्येकं पदे मूलरूपेण यद् विराजते तत् प्रातिपदिकम् । प्रातिपदिकैः सह सुप् विभक्तीनां योगेन सुबन्तपदानां निर्माणं भवति, धातुभिः सहः तिङ् प्रत्ययानां योगेन तिङन्तपदानि जायन्ते । कथ्यते च '**सुप्तिङन्तं पदम्**'**।**

**योग्यतां वर्धयत**

संवाद अस्य शब्दस्य व्युत्पत्तिः सम् उपसर्ग पूर्वक वाद शब्देन जायते। सम इत्यस्य अर्थः समान एवं वाद इत्यस्य बोलना इति अर्थः अस्ति।अनेन अस्य अर्थः वार्तालापः अभवत्।मुलताय संवादार्थम् अन्यः जनः अपि अपेक्षित भवति। द्वयोः जनयोः मध्ये यत् वार्तालापं भवति तदेव संवादः।

**पाठ संप्रेष्यः**

- भाषा मूलतः संवादरूपेण विकसति ।
- संवादे पात्राणि भवन्ति ।
- संवादः सन्दर्भानुसारं भवति ।
- संवादे भाषा पात्राणां योग्यतानुसारं भवि ।
- संवादे शुद्धभाषायाः प्रयोगः आवश्यकः ।
- संवादे कथितानां वाक्यानां सहायतया पात्राणां चरित्रचित्रणं भवन्ति।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक संवादानाम् अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- संवाद लेखनस्य अभ्यासं कुरुत।